देवीसूक्त (पूर्ण)

देवी सूक्त

श्रीगणेशायनमः अहमित्यष्टर्चेत्रयोदशांसूक्तं वागांभृणत्स्वमहर्षेर्दुहितावाङ्नाम्नीब्रह्मवि
दुषीस्वात्मानमस्तौत अतः सऋषिः सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता तेन ह्यतादात्म्य
मनुभवंती सर्वजगद्रूपेण सर्वाधिष्ठानत्वेन च अहमेव भवामीति स्वात्मानं स्तौति द्वितीया
दे॰ सू॰ १ जगती शिष्टाः सप्तत्रिष्टुभः चानुक्रांतं अहमष्टौ वागांभृणी तुष्टाव आत्मानं द्वितीया जगती
ति विनियोगः तत्र प्रथमा अहं रुद्रेभिरिति अहं सूक्तसदृशी वागांभृणी वागांभृणत्यपत्यं ब्र
ह्मतो। अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः अहं मि
त्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा १
लकारणं तद्रूपा भवंती रुद्रेभिः रुद्रैरेकादशभिः इत्थंभावे भावे तृतीया तदात्मना
चरामि एवं वसुभिरित्येतत्तदात्मना चरामीति योज्यं उतापिच आदित्यैः सहचरा
मि उतापिच विश्वदेवैश्च तथा मित्रावरुणौ मित्रं च वरुणं च उभावपि बिभर्मि द्वितीया
या आकारः उभा उभौ अहमेव जगत्कल्पतया बिभर्मि धारयामि इन्द्राग्नी अप्यहमेव धार
यामि उभा उभौ अश्विना अश्विनावपि अहमेव धारयामि मयि हि सर्वं जगत् ७ १

कौरजनर्द्वाभ्यसंप्तामनृत्यपते मायाच्छगादकारेणाविवर्तते तादृप्याम्नायपाश्राधारत्वेनाश्र
सिद्धस्याप्रियलक्षणः उक्तस्यार्थस्योपपत्तिः १ द्वितीया अहं सोममाहनसमिति अहमाहनसं
आहन्तव्यं अभिषोतव्यं सोमं यद्वा शत्रूणामाहन्तारं दिविवर्तमानं देवतात्मानं सोमं अह
मेव बिभर्मि तथा त्वष्टारं उतापि च पूषणं भगं अहमेव बिभर्मि तथा हविष्मते हविर्युक्ता
य सुप्राव्ये शोभनहविर्दानानां प्रापयित्रे तर्पयित्रे अवते तर्पणार्थिने अविद्भ्यस्तेतरिभ्यः

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं अहं द
धामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते २

इति द्वितीयमन्त्रस्य: चतुर्थ्येकवचने यणि उत्पन्नत्वादितयायेतः स्वरितोऽनुदात्तस्येमनु
दात्तस्य सुपः स्वरितत्वं सुन्वते सोमाभिषवं कुर्वते शतृप्रत्यय इति चतुर्थ्यां उदात्तत्वं इदमा
य यजमानाय द्रविणं धनं यागफलरूपं अहमेव दधामि प्रयच्छामि एतत्स्वलक्षणः
फलदातृत्वं फलमनतरूपयतत्तदेवतारूपेण भगवता भाष्यकारेण समर्थितम् २

अर्हण्णक्षी इति अर्हण्णक्षी ईश्वरनाम्नेतत् सर्वस्यजगतः ईश्वरी तथा वसूनां धनानां संग
मनी संगमयत्री उपासकानां प्राप्यित्री चिकितुषी यत्साक्षात्कर्त्तव्यं परंब्रह्म तद्ज्ञान
दे॰सू॰भा॰ वती स्वात्मतया साक्षात्कृतवती अतएव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या याए
२

अर्हण्णक्षी संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीम् ३

बहुणा विविधश्रिष्ठा अहं तां मां भूरिस्थात्रां बहुभावेनस्थितं चात्मनातिष्ठमानां भूरिभू
रीणि बहूनि भूतजातानि आवेशयंती जीवभावेनात्मानं प्रवेशयंती ईदृशीं पुरुत्रा व
हुषु देशेषु व्यदधुः विदधंति प्रकुर्वंति उक्तप्रकारेण विश्वरूपेण व्यस्थानात् यत्कुर्वंति ३
तत्सर्वं मामेव कुर्वंतीत्यर्थः ३ मं॰२

मयास्तु इति यः अनन्यमतिः स उक्तरूपप्रामाण्येनानन्यमतिः यः शास्त्राणि पश्यति सोपि समयैव पश्यति यः शास्त्रा
णीति यथा सो ऽस्मत्प्रसादिष्यादत्तं केनेति सोपि समयैव प्राप्नोति अनन्यमतेः अनादिकैः तृणादिभ्यः
सार्वधातुके इतीडागमः आगमेनेति तेनात्र पश्यत्प्रत्यक्षेण च अनन्यत्वेन त्रिविध रूपं पश्यति
सोपि ज्ञानचक्षुषा विज्ञानेन समयैव पश्यति सोपि समयैव प्राप्नोति कुम्भकारे शुचः स्वेनेति शब्दप्रत्ययः
धातोः भावकर्म यत् इत्यत्र मन्तव्यं इति स्वरूपेण स्थितः मम अनन्ततिते समयमन्तव्यो ऽमन्यमानाः अज्ञा
नेतः उपदिशामि उपदिशामीति संसारे तेन हीना भवन्ति मन्तव्यादिकं [illegible] सम्प्रत्यक्षेण समासेनोक्तम्

मयासोऽनन्यमतिर्यो विपश्यति यः शास्त्राणि पश्यति सम्प्रत्यक्षेण अ
मन्तव्यो मां तदुपदिशामि शुद्धिं स्नात आप्तिं वन्दे वदामि ४ लक्ष्मी॰

येनोपदानत्वं यथा भावेन प्रत्ययः ततो बहुव्रीहौ नञ् सुभ्यामिति तत्र उपदानोदानत्वं सामर्थ्यं तत्र म
द्विषयज्ञानं रहितात्मत्वः हेतुनाविद्यानां स्वेन शुद्धिं मया वक्ष्यमाणं [illegible] छान्दसो विकरणस्य लुक्
शुभ्रत्वं पक्षे ध्वस्य इतिहेतुर्धिभावः किं तत् आप्तमत्र आद्धिं आप्तिः आपन्नपापेन शुद्धान्तेन लभ्य
मित्यर्थः शुद्धतरे रूपसर्गवर्जितं शिष्यते इति अग्रस्त्रस्य उपसर्गवर्जनमात्रात् उपसर्गेण धाः क्विप् इति
क्विप् प्रत्ययः मत्वर्थीयाः इत्थं ब्रह्मात्मकं वस्तु तेनत्र्यं वदामि उपदिशामि ४ ॐ ॐ ॐ

अहमेवेति अहं स्वयमेव जुष्टं वस्तु ब्रह्मात्मकं वदामि उपदिशामि देवेभिः देवैः इन्द्रादिभिरपि सेवितं उतापि
च मानुषेभिः मनुष्यैरपि जुष्टं ईदृशीविद्याहं यं कामये यं यं पुरुषं रक्षितुमहं वाञ्छामि तं तं पुरुषमुग्रं क-
दे·सू·भा· रोमि तमेव ब्रह्माणं स्रष्टारं करोमि तमेव ऋषिमतीन्द्रियार्थदर्शिनं करोमि सर्वेभ्योऽधिकं करोमि
३ तमेव सुमेधां शोभनप्रज्ञं करोमि ५ अहं रुद्रायेति पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य षष्ठ्यर्थे च-
तुर्थी महादेवस्य धनुः ज्याम् अहमातनोमि ज्यया आततं करोमि किमर्थं ब्रह्मद्विषे ब्राह्मणानां

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः यं कामये तं तमुग्रं कृ-
णोमि तं ब्रह्माणं तमृषिं तं सुमेधां ५ अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे
शरवे हन्तवा उ अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ६

द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरवासिनं असुरं हन्तवै हन्तुं हिंसितुं हन्तेस्तुमर्थे सेसेनिति तवैप्रत्य-
यः अन्तश्च तवै युगपदिति आद्यन्तयोर्युगपदुदात्तत्वम् शृ हिंसायाम् अस्मात् शॄस्वृस्निहीत्यादि-
ना उप्रत्ययः क्रियार्थोपपदस्य च कर्मणि स्थानिन इति कर्मणः संप्रदानत्वाच्चतुर्थी उशब्दः पूरकः अहमेव समदं
समाद्यन्त्यस्मिन्निति समदं संग्रामः स्तोतृजनार्थं शत्रुभिः सह संग्रामं अहमेव कृणोमि करोमि
तथा द्यावापृथिवी दिवं च पृथिवीं च अन्तर्यामितया अहमेव आविवेश प्रविष्टवती ६ ॐ ॐ ॐ ॐ

३

अहं सुवे पितरमिति द्यौः पितेति श्रुतेः पिता द्यौः पितरं दिवं अहं सुवे प्रसुवे जनयामि आत्मनः आका
शः संभूत इति श्रुतेः कुत्रेति तत्राह अस्य परमात्मनः मूर्धन् मूर्धनि उपकारणभूतेनस्मिन्दिवि
पयत्कार्यजातं सर्वं विजायते तं तुष्टुप इत्यमम योनिःकारणं समुद्रे समुद्रवन्ति अस्माद्भूतजातानीति
समुद्रः परमात्मा तस्मिन् अप्सु व्यापनशीलासु धीवृत्तिषु अन्तर्मध्ये यद्ब्रह्म चैतन्यं तन्मम कारणमि
त्यर्थः यतः ईदृश्यहमस्मि ततो हेतोः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अनुप्रविश्य

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ततो वि तिष्ठे भुवना
नि विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ७ ३१३१३२३२३१३१३२३१

विशिष्टे विविधं व्याप्य तिष्ठामि स्तनवप्रविष्टः स्य इत्यात्मनेपदं उतापि च अमूं द्यां विप्रकृष्टदेशेऽवस्थि
तं स्वर्गलोकं उपलक्षणमेतत् एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदी
येन देहेन उपस्पृशामि यद्वा अस्य भूलोकस्य मूर्धन् मूर्धन्युपरि पितरं आकाशं सुवे समुद्रे जलधौ
अप्सु उदके अन्तर्मध्ये मम योनिः कारणभूतः अंभृणाख्य ऋषिर्वर्तते यद्वा समुद्रे अन्तरिक्षे अ
प्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्मचैतन्यं प्रवर्तते अहंकारात्मिकासती सर्वाणि तो८ अ
भुवनानि व्याप्नोमि अन्यत्समानं पूर्वेण ७

अहमेवेति विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपे
णोत्पादयंती अहमेव परेणानधिष्ठिता स्वयमेव प्रवामि प्रवर्ते वात इव यथा वातः परेणाप्रे
रितः सन्स्वेच्छयैव प्रवाति तद्वत् उक्तं सर्वं निगमयति परो दिवा पर इति सकारांतमव्ययं परस्तादर्थे व
र्तते यथाऽधः इत्यधस्तादर्थे तद्योगे च तृतीया सर्वत्र दृश्यते दिवः आकाशस्य परस्तात् एना पृ
दे.सू.भा. थिव्या द्वितीया टौस्स्वेन इति इदम एनादेशः सुपां सुलुगिति तृतीयाया आद्यादेशः अस्याः पृ
४ थिव्याः परः परस्तात् द्यावापृथिव्योरुपादानमुपलक्षणं एतदुपलक्षितात्सर्वस्मात् विकारजाता

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा परो दिवा पर एना पृथि
व्यैतावती महिना संबभूव ८ इति ऋग्वेदोक्तं देवीसूक्तं समाप्तम्

त्परस्ताद्वर्तमाना असंगोदासीनतटस्थब्रह्मचैतन्यरूपाऽहं महिना महिम्ना एतावती संबभूव
एतच्छब्देन उक्तं सर्वं परामृश्यते एतावत्परिमाणमस्याः यत्तदेतेभ्यः परिमाणे इति वतुप् आ सर्व ४
नाम्न इत्यात्वं सर्वजगदात्मना अहं संभूतास्मि महच्छब्दादिमनिचि टेरिति टिलोपः ततस्तृती
यायां उदात्तनिवृत्तिः उदात्तत्वं छांदसो मलोपः अष्टमस्य सप्तमे द्वादशो वर्गः ८ इति देवीसू

सूरेणानस्याः

श्रीः

श्रीगणेशायनमः ॐ अस्यश्रीरात्रिसूक्तस्यकुशिकसौभरऋषिः रात्रीदेवता गायत्रीछं
दः सकलाभीष्टसिद्ध्यर्थेजपेविनियोगः रात्रीव्यख्यदायतीपुरुत्रादेव्यक्षभिः विश्वा
अधिश्रियोधित १ ओर्वप्रामर्त्यानिवतोदेव्युद्वतः ज्योतिषाबाधतेतमः २ निरुस्व
रा० सू सारमस्कृतोषसंदेव्यायतीअपेदुहासतेतमः ३ सानोअद्ययस्यावयंनितेयामन्न
५ विक्ष्महिवृक्षेणवसतिंवयः ४ निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः निःश्ये
नासश्चिदर्थिनः ५ यावयावृक्यंवृकंयवयस्तेनमूर्म्ये अथानःसुतराभव ६
उपमापेपिशत्तमः कृष्णंव्यक्तमस्थित उषऋणेवयातय ७ उपतेगाइवाकरंवृ
णीष्वदुहितर्दिवः रात्रिःस्तोमंनजिग्युषे ८ इतिऋग्वेदोक्तंरात्रिसूक्तम्
लिखितंरामदयालमिश्रेणशुभंभूयात् संवत १९ शाकः १७६५ पौषशु
क्ल ७ बुधवासरे ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ५